।।श्रीगणेशाय नमः।।

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ||१||

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ||२||

गणानामधिपश्चण्डो गजवक्त्रास्त्रिलोचनः ।प्रसन्नो भव मे नित्यं वरदातर्विनायक ||३||

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ||४||

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।द्वादशैतानि नामानि गणाधीशस्य यः पठेत् ||५||

विद्यार्थी लभते विद्यां धनार्थी विपुलं धनम् । इष्टकामं तू कामार्थी धर्मार्थी मोक्षमक्षयम् ||६||

विद्यारंभो विवाहे च प्रवेशे निर्गमे तथा ।संग्रामे संकटे चैव विघ्नस्तस्य न जाय ते ||७||

॥ इति श्रीमुद्गलपुराणोक्तं श्रीगणेशद्वाशनामस्तोत्रं संपूर्णम् ॥